॥श्रीगणेशाय नमः॥ नत्वा गणेश्वरं देवं शारदां गुरुमाताम्॥ आशौचस्य संग्रहं
त्रिंशत्श्लोक्या व्याख्यां करोम्यहं॥१॥ तत्र स्मार्तकर्म मुल्लंघ्य लोकप्रसिद्धत्वान्मनु
स्मरन् गर्भविपत्ति निमित्ताशौचं क्रमेण आशौचं प्रतिपादयति॥ षण्मासाभ्यंतरेषु
स्वपुरुषनिहिते गर्भमात्रे विनष्टे माता तन्मास संख्यासमदिनमशुचिः स्नानं शु
द्धाः सपिंडाः॥ अंसे मासद्वये तु त्रिदिनमशुच्यतः परं सूतिवत्स्यात् चातुर्वर्ण्यस्य
तु संभवति वर्ष्यास्य प्रोच्यते शौचमात्रं॥१॥ अस्यार्थमन्वयः॥ षण्मासाभ्यंतरेषु
षण्णां मासानामभ्यंतराणि मध्यानि तेषु स्वपुरुषनिहिते पत्या निहिते गर्भमात्रे अ
र्णाभय नगर्भे विनष्टे च्युते माता जननी तन्मास संख्यासमदिनं तेषां मासानां गर्भ
प्रत्येकं रणादारभ्यैयायाया संख्या तया समानि दिनानि यत्र तत् यथा भवति तथा अशुचि
रशुद्धास्यादत्र यद्यप्य विशेषेणोक्तं तथापि चतुर्थमासमारभ्य षण्मासपर्यंतं द्र
ष्टव्यं॥ आद्यमासत्रये त्रिरात्रमेव मातुरविशेषेण सपिंडानां नाशौचं॥ तथा च म
रीचिः॥ गर्भस्रावां यथामासमचिरे तूत्तमे त्रयहात्॥ अचिरस्था यमासत्रयेतु

॥१॥

त्रिभिर्ब्राह्मणजातौ त्रयोदिवसाः ॥ तथास्मत्संतरमपि ॥ आरे मातुः त्रिरात्रं स्यात् सपिंडशौच
मर्दनमिति ॥ एवं मातुराशौचमभिधाय सपिंडानामाह ॥ स्नानं शुद्धाः सपिंडाः सपिंडाः सप्त
मपुरुषावसानाः स्नानेन शुद्धाः स्युरिति सद्यः शौचं सपिंडानां गर्भस्य पतने सति निस्म
रणात् एवं सपिंडानां चतुर्थमासादि त्रयोविशेषेण सद्यः शौचे प्राप्ते पंचमषष्ठयोर्विशेष
माह ॥ अंत्येष्टि ॥ अंत्येमासद्वयेपञ्चानां मासानां मध्ये यदंत्यमासद्वयं पंचमषष्ठाख्यं तत्र
सपिंडाः स्त्रिदिनमशुचयः स्युरिति संबंधः ॥ तथा च स्मृतिः ॥ पाते मातुर्यथामासं पित्रा
दीनां दिनत्रयमिति वचनात् ॥ अत्र पातशब्दः पंचमषष्ठमासोपलक्षणपरः ॥ पातः पं
चमषष्ठयोरिति वचनादिति भावः ॥ अतः षण्मासादूर्ध्वं सप्तमाष्टममासयोः स्रुतिव
स्यादाशौचमितिशेषः ॥ स्रुतिः प्रसवे जननं तत्रैवेति ॥ स्रुतिवत् प्रसवनिमित्तं दशा
हं नान्यन्निमित्तमितियावत् ॥ स्रुते दशाहाशौचानिमित्तता ॥ दशाहं शावमाशौचं स
पिंडेषु विधीयते ॥ जनने च नमेव स्यान्निपुणानां शुद्धिमिच्छतामिति मनुक्तः प्रसि
द्धं ॥ तथा च स्मृतिः ॥ षण्मासाभ्यन्तरे यावत् गर्भस्रावो भवेद्यदि ॥ तदा माससमैः तासां
दिवसैः शुद्धिरिष्यते ॥ तथा हारितोपि ॥ जातमात्रे मृते मृतजाते वा सपिंडानां दशाहमिति ॥

॥१॥

एतस्य चातुर्वर्ण्यसाधारणतामाह ॥ चातुर्वर्ण्यस्य तुल्यमिति ॥ एतदाशौचं चातुर्वर्ण्यस्य च
तुर्णां वर्णानां तुल्यसाधारणं भवति ॥ न कश्चन वर्णकृतो विशेषः ॥ न केवलमेवमिद
तुल्यं वयावस्थाविशेषोपरतिनिमित्तमपि चतुर्वर्णसाधारणमित्याह ॥ वयस्यपीति ॥
यद्वयसि वयोविशेषोपरतिनिमित्तमाशौचमात्रं वर्णविशेषोपादानरहितेनाविहितमा
शौचं तदपि चातुर्वर्ण्यस्य तुल्यं भवति ॥ तदुक्तं ॥ व्याघ्रपादमुनिना ॥ तुल्यं वयसि सर्वेषां
मातक्रां तेनथे वन्चेति ॥ अत्र स्वपुरुषान्हित इत्यनेन परपुरुषान्हिते जननीयतिरि
रोगाशमाशौचाभावो वन्नितः ॥ इदानीं पूर्वप्रसवनिमित्तमाशौचं द्वितीयव्रतेनाह ॥
जन्माशौचांतराले यदि शिशुजननं नालच्छेदात्पूर्वकाले निःप्राणो निःपतेत् जनन
जनितमाशौचमस्य दशाहं ॥ प्राणाभिच्छेदनाच्चेन्निधनमुपगततस्य महेषो बन्धुभिः
सर्वैः कार्या स्मृतिकायां त्रिरह च से कार्ल कं प्रेतं ॥ कृत्स्नसद्यः ॥ २ ॥ जन्माशौचांतराले जन्मा
शौचमध्ये नालच्छेदात्पूर्वकाले नालच्छेदनानंतरं यदि शिशोर्निशानमुपरमः स्यात् ॥ निः
प्राणः प्राणरहितो वा निःपतेन्निर्गच्छेत् तदा जननजनितमाशौचं दशाहं संपूर्णमस्ये

3

॥२॥

व नशा वशौचेन तं त्रि प्रति ॥ एवं तु जन्माशौचे वै वशि शु पर मम निमित्ताशौचान श्यात
रति भ्रातः ॥ तदुक्तं वृद्धमनुना ॥ दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः ॥ शावाशौचं न
कर्तव्यं सूताशौचं विधीयत इति ॥ चेद्यादि जननानंतरं नाभिच्छेदनात्प्राक् निधनमु
पगतस्तर्हि सर्वेषां पित्रादीनां त्र्यहेणैव शुद्धिः स्यादिति विशेषः ॥ इह विषये स्नातका
या मातुः सकलं पर्णं दशाहं प्रसवनिमित्तं शावं शुद्धिः [illegible] सपः ॥ प्रसवनिमित्तमेव
भवति ॥ दशाहमिति भावः ॥ जीवन् जातो यदि ततो मृतस्तत्र [illegible] तु ॥ सूतकं सकलं
मातुः पित्रादीनां त्रिरात्रमिति वचनात् ॥ यावन्नाच्छिद्यते नालं तावन्नाप्नोति सूत
कं ॥ छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति वचनाच्च ॥ कालविशेषेण
दशाहाद्याशौचापवादमभिधाय वयोविशेषाभिप्रायेणापि तदपवादं दर्शयति ॥ जनेनाह ॥
आ नं प्राक् नामतो वा [illegible] दशान्तं जननतो ऽहः परेते ऽब्दाद् [illegible] अपि सद्यः
स्नादुपरि दिनमाद्याद्दंतजन्मौल [illegible] ॥ [illegible] तु त्रिरात्रं त्रिदिनमितरथा [illegible]
आ सद्यः शौचं मातापित्रोस्तु पुत्रे त्रिदिनमदशाने संनिधौ [illegible] ॥ ३ ॥ नामतः प्रा

॥२॥

क्नामकरणात्सर्वे परते परते स्नानं स्नानमात्रं च न तं त्रिमिताशौचमिति॥ प्राक्
नामकरणात्सद्यः शौचमिति त्र्यां स्वस्मृतेः॥ नामकरणादूर्ध्वं दंतजननादर्वाक्पर
तेअग्निदग्धे दग्धे अहः एकरात्रं॥ अहस्तं दत्तकं न्यासु बालेषु च विशोधनमिति वच
नात्॥ अदग्धे तु सद्यः शुचिः स्नानमात्रं आदंतजन्मनः सद्य इति वचनात्॥ तदुपरादि
नमात्रं अदंतचौलं अन्यैस्तु उपरादंतजननादूर्ध्वं यावत्त्रिवर्षं चूडाकरणात्त्रिरात्रमिसा॥
सच्चौले तु त्रिरात्रमिति सच्चौले कृतचौले परेते त्रिरात्रं॥ निवृत्तचूडकानां तु त्रिरा
त्राच्छुधिरिष्यत इति मनुवचनात्॥ वर्षत्रयानंतरमभिन्नोपेण त्रिरात्रं इत्याह॥ त्री
त्रमितरथाप्याग्रनान्दहनं तथा अदंतचौले अपि शाक्षात् दंतचौलेपि च संस्थि
तेतदुपरिवर्षत्रयादूर्ध्वं यावदुपनयनं त्रिरात्रं अयमर्थः॥ प्रथमाब्दे दंतचौलस्यया
नदुपनयनं त्रिरात्रं॥ वर्षत्रयानंतरं अदंतचूडस्यापि यावदुपनयनं त्रिरात्रमिति॥
त्रिरात्रमाव्रतादेशादिति वचनात्॥ एवं नयोनेस्याग्निशेषेण शौचावरोपमिति॥ अ
भिधाय जातसाशौचमाह॥ मासशौचमिति तदुपरि उपनयनानंतरं जातशौचं दशाहादि

कर्मेति यावद्दशरात्रमतः परमिति वचनात्। एवमविशेषेणाप्यजातदंतमरणे मातापित्रोरपि
सद्यःशौचादिप्राप्तावपवादमाह। मातापित्रोस्तु पुत्र इत्यादिना। अदंतजातेऽजाते दंते परे तेऽपि मा
तापित्रोः त्रिरात्रमेव बालानां जातदंतानां त्र्यहाच्छुद्धिरिति कश्यपवचनात्। दैजिकादभिसं
बंधादनुरूप्याद्धर्म्यमाहमिति स्मृत्यंतरात्। इतद नामकरणजननतोऽहारस्यादित्योक्तं सर्वं सं
न्निधौ शिशुमरणे वेदितव्यमित्याहासन्निधौ नष्टे चेष्टे इति संन्निधेसंनिधेन ष्ट्ये ष्टेनष्टा
शेषायेस्येति मतइतियावत्। अतिक्रांताशौचमेतन्न भवतीति भावः। तदुक्तं व्याघ्रपादमु
निना। उपनयनात्तेतु विषमं तस्मिन्नेनातिकालजमिति॥ अथ चतुर्थे दत्तां। पुनर्धर्मे दत्तेत्यसं
स्कारिकरजननीसोदराणां दशाहं यद्यस्य स्यात्तमेवापि कर्महविषये शौचकं तु त्रि
रात्रमिति। अर्द्धपद्यस्यायमर्थः। जन्मनदूर्ध्वं पुनर्धर्मे अद्विवर्षे असंस्कृतगतसंस्कृते उपरत इति
यावत् जनिकरः पिता जननी माता तासोदराः भ्रातरः एषां दशाहमाशौचमित्येकपक्षः।
गर्भस्थे प्रेते मातुर्दशाहं भ्रातउभयोः हते नाभिसोदराणामिति पैंग्यवचनात्। पक्षांतर
माह। यद्वेति अथवा पित्रादित्रयस्य त्रिराशौचे अस्पृश्यत्वमेवाधिकं। सूतकं कर्मान
धिकारित्वलक्षणं त्रिरात्रं सपिंडैः सह समानमेवेति भावः। एतत् पक्षद्वयं। त्रिरात्रं च

॥३॥

त्रिरात्रं वा शावमाशौचमिष्यते। ऊनद्विवर्षे उभयोः सूतकं मातुरेव हि स्येत ह्यख्याने नेत्रस्ना
नेभ्यश्चाचार्यैः स्पष्टीकृतं। अथ स्त्रीषु वयोवस्थाविशेषादाशौचविशेषमाह। कारोतितु नराद्ध्वेनि॥
॥ स्त्रीषु स्नानेन शुध्येत् त्रिपुरुषाविषये ज्ञातिराक्षौरकालाद् दर्वीकृताद्वानतो द्वाभ्यां त्रिरूपयम
नाद्दत्तगोत्रं स्वकं च॥ ५॥ नामकरणादूर्ध्वं क्षौरकालादर्वाक् यावत् क्षौरकालं स्त्रीषु का
न्यासु मृतासु त्रिपुरुषाविषये यावत्त्रिपुरुषं यो ज्ञातिः स स्नानमात्रेण शुध्येत्॥ अत्र त्रि
पुरुषविषयेत्युक्तेन कन्यानां सापिंड्यं अप्रत्तानां तु स्त्रीणां त्रिपुरुषा विज्ञायत इति वसिष्ठ
कृममिमतं एतच्च सद्यःशौचमचूडायां च कन्यायां सद्यःशौचं विधीयत इत्यापस्तंबोक्तं
ज्ञेयं। वाग्दानतोऽर्वाक् प्रथमचूडाकरणादनंतरमत एकेनैव दिवसेन ज्ञातिः शुध्येदि
ति पूर्वेण संबंधः। अहस्त्वदत्तकन्यासु बालेषु च विशोधनमिति स्मरणात्॥ त्रिस्त्रिरूपय
मानादिति। वाग्दानादूर्ध्वं उपयमनाद् द्विवाहादर्वाक् भर्तृगोत्रं परिणेतृगोत्रं च पूर्वोक्तदिनैः
शुध्येत्। इयं च शुद्धिः स्त्रीणां असंस्कृतानां तु अहात् शुध्यंति बांधवाः। यथोक्तेनैव कालेन
न सिध्यंति तु नो भयय इति मनुक्ता वेदितव्या॥ चतुर्वर्णसाधारणी शुद्धिरुक्ता वर्णविशेष
णदशाहाद्याशौचविशेषं पंचमश्लोकेन पूर्वार्द्धेनाह॥ ५॥ जन्मन्यैपेत मृत्सा वपि च दशानि

॥ऽ१

शा द्वादशाहानि पक्षमासं वर्णाः क्रमेणाशुचय उचितहस्तत्स्य द्वाजातिस्तु पक्षमिति ॥ अन्म
निजननाशौचे उपेत उपनीतः कृतोपवीतसंस्कारः एवंभूतेन तस्य मसः तस्मिन्नोपेतस्य ब्रा
उपनीतादिमरणे ब्राह्मणाद्याश्चत्वारो वर्णाः क्रमेण दशत्रिंशादिकालं अशुचयः स्युः । ब्रा
ह्मणो दशाहं क्षत्रियो द्वादशाहं वैश्यः पक्षं पंचदशाहं शूद्रो मासं त्रिंशद्दिनानीति क्रमः । उ
चितहस्तत्पाकयज्ञेषु शूद्रपाकादिविहितकर्मानुष्ठानशीलः शूद्रः । पंचदशाहमेव न मासं । क्ष
त्रियैस्य द्वादशाहानि विप्रः पंचदशैव तु । त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिना ॥ १ ॥
इति वचनात् । इदानीं तु तराद्वेन संबंधिपुरुषविशेषोपरमे दशाहाद्याशौचापवादमाह ॥
वानप्रस्थयतीनां च परमति कुब्जे पंडके चाद्रवः स्यायोषि होमविप्रमुखैस्मृतवती चोदितं
युद्धनिहतस्य सद्यः ॥ ५ ॥ कुब्जे वानप्रस्थे तीयाश्रमस्थायतौ चतुर्थाश्रमिणि पंडके क्ली
बे योपरमांतिसंस्थिते आप्लुवः स्नानमात्रं शुद्धिकारणमिति यावत् । योषि होमविप्रमुखैस्
मृतवति दिनमहोरात्रमाशौचं युद्धनिहते साक्षात्युद्धहते सद्यः स्नानमात्रात् शुद्धिः स्या
त्परवैण संबंधः । युद्धघातेन कालान्तरमृतानामपि दिनमेव शुद्धिहेतुः । ब्राह्मणार्थे
विपन्नाये योषितां गोगृहे पि च ॥ आहवेषु च हतानां च एकरात्रमशौचकमिति स्मृतेः ॥

॥ऽ

उपनेयाहरेशास्त्रेः क्षत्रधर्महतस्य च । सद्यः संतिष्ठते यस्मात् तथा शौचमिति स्थितिरिति मनु
स्मरणाच्च । एतच्च अज्ञातमेवाशौचदिननिमित्तमिति मिताक्षरा । तं वृद्धः तथा च स्नानानंतरमसगतो दशा
हादिप्राप्त्यौ कश्चिदपवादमाह ॥ पैठीनसिनाह ॥ शावे तीते दशाहात्प्रभृति विषयके प्राक्त्रि
मासात् त्रिरात्रं पक्षिण्यादृष्टमासात् दिनमिह नवमात्स्यात् ततः स्नानमात्रं ॥ स्नानं देशांतरस्थेत्य प
पितृविषये देशकालाभिविशेषात् स्वस्य मातुः सपत्न्याः त्रिदिनमिति व्यतिक्रांतः शौचं समानं ॥ द
शावेशावच्छौचे दशाहात्प्रभृति दशाहाधिके अतीते अभीते अतिक्रांते दशदिनानंतरं ज्ञाने द
तिथानंतरविषयकं इति देशेयस्मिन् देशे मृतिस्तत्र च लाते त्रिमासात्प्राक् प्रथममासत्रये त्रिरा
त्रं त्रिमासानंतरं चतुर्थमासमारभ्य षण्मासं यावत् पक्षिण्या रूपं परादिनाप्यायुक्ता रात्रिः
आगामिवर्तमानाहयुक्ता यां निशि पक्षिणी सपरः । षण्मासादूर्ध्वं यावन्नवमासं दिनम
होरात्रं । ततो नवमासादूर्ध्वं स्नानमात्रं स्यादिति संबंधः । देशांतरमृतिः श्रवणे अविशेषे
ण स्नानमेवेत्याह । स्नानं देशांतरस्य इति मासत्रये त्रिरात्रं स्यात् षण्मासात् पक्षिणी तथा ॥ अत
स्नानं नवमादर्वाक् ऊर्ध्वं स्नानेन शुध्यति । इति वृद्धवसिष्ठवचनात्तथा । देशांतरमृतं श्रुत्वा क्ली
बे वैखानसे यतौ । मृते स्नानेन शुध्यंति गर्भस्रावे च गोत्रिण इति स्मृत्यंतराच्च । देशांतरलक्ष

नंत्याह बृहस्पतिः। महानद्यंतरं यत्र गिरिर्वा व्यवधायकः। वाचो यत्र विभिद्यंते तद्देशांतर
मुच्यते। देशांतरं वदंत्येके षष्टियोजनमायतं। चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव च। इति। एतद्दु
स्यापवादमाह। अथ पित्रोर्विषय इति देशकालविशेषादिति सर्वदेशे सर्वकालेपि तु मातुः श्रव
रणे सुतानां स्नसंज्ञातिविहितं दशाहादिकं पित्रविषय इति पिता च माता च पितरौ तौ चो विषयो
यस्येति समासः। तथा च पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः। श्रुत्वा तद्दिनमारभ्य दशाहं
सूतकी भवेदिति वचनात्। अपरमातुर्विशेषमाह। मातुः सपत्न्याः त्रिदिनमिति अपरमात
र्यपेतायां पुत्रस्य देशकालविशेषात्त्रिरात्रमाशौचं। उक्तं। पितृपत्न्यामपेतायां मातृवर्ज्यं द्वि
जोत्तम। संवत्सरे व्यतीतेपि त्रिरात्रमशुचिर्भवेदिति। अनेनाशौचशब्देन अतिक्रांते जन्माशौ
चे अशुद्धिर्नेति सूचितं। तदुक्तं। नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपि ति देवलेनरनद
तिक्रांताशौचं सर्ववर्णसाधारणमित्याह। इदमतिक्रांताशौचं समानं सर्ववर्णसाधारणमित्यर्थः।
प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव हि। सर्वेषां वत्सरे पूर्णे प्रेते दत्वोदकं शुचिः। इति वच
नात्। तुल्यं वयसि सर्वेषामतिक्रांते तथैव चेति। व्याघ्रपादवचनात्॥ स्वकुलोत्पन्नमृताशौ
चमुक्त्वा कुलांतराश्रितानामपि मृतानामाशौचमाह॥ सप्तमादष्टमं नरमभिच्छन्नो॥

॥६॥

पित्रोर्गेहे समूढाप्रसवमरणयोरेकरात्रं त्रिरात्रं स्यात्पित्रादीनामथ पितृमरणे ऊढपु
त्र्याः स्त्रिरात्रं। प्रेते श्वाचार्यमातामहदुहितृसुतश्रोत्रियलौकिकसयाज्यस्वस्रीयेषु त्रिरात्रं दिवस
मशुचिः सोदकास्तु भवंत्यत्र॥ पित्रोर्गेहे मातापितृगेहे संमूढा प्रसवमरणयोः समूढायाः
प्रसवे मरणे तयोः पित्रादीनामेकरात्रं त्रिरात्रं स्यात्तं रम्यथा मातापितृगृहे समूढाः परि
णीता कन्या प्रसूता मरणं नाशो भवति तदा तस्याः पित्रादीनां क्रमात् एकरात्रं त्रिरात्रं स्यात्तां प्रस
वे एकरात्रं मरणे त्रिरात्रमित्यर्थः॥ अत्रापि पित्रोर्गेहे इत्यनेन भर्तृगेहे इत्यनेन भर्तृगेहे प्रसूता
यावत्पितृपक्षाणां सर्वेषां माशौचाभावः सूचितः। तथाच विष्णुः। संस्कृतासु स्त्रीषु नाशौचं पि
तृपक्षे तत्प्रसवे मरणे चेत्पितृगेहे स्यातां तदैकरात्रं त्रिरात्रं चेति। अथ पितृमरणे ऊढपुत्र्याः
त्रिरात्रमिति। अथ शङ्खेनाधिकारान्तरस्य चनात् ऊढपुत्र्याः परिणीतकन्यकायाः पितृम
रणे मातापित्रोर्मरणे त्रिरात्रं। पित्रोरुपरमे स्त्रीणामूढानां तु कथं भवेत्। त्रिरात्रेण तु शुद्धिः
स्यादित्याह भगवान्यमः। इति वृद्धयाज्ञवल्क्यस्मरणात्। प्रेते श्वाचार्यमातामहदुहित
सुतश्रोत्रियलौकिकसयाज्यस्वस्रीयेषु त्रिरात्रं। उपनयनपूर्वकं वेदाध्यापको आचार्यः एक
शाखाध्ययनक्षमः श्रोत्रियः स्मृतो गांधर्ववादियज्ञकर्मरतः सयाज्यो याजने मानसहितः शा

पात्रसिद्धाः। एतेषु मृते त्रिरात्रमाशौचं त्रिदिवसमध्ये निः सोदकः स्नानमयत्रेति। सोदकः सम-
नोदकः सप्तपुरुषानंतरं सप्तपुरुषावसानः उभयत्र जाताशौचे मृताशौचे च त्रिदिवसमध्ये चयः
अशुद्धः स्यात्। तथा बृहस्पतिः। अहं मातामहाचार्यश्रोत्रियेष्वशुचिर्भवेत्। तथा प्रचेताः॥
मृते चामिसियाज्ये च त्रिरात्रेण विशुध्यतीति। संस्थिते पक्षिणीरात्रं दौहित्रे भगिनीसु-
तेति। संस्थिते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थित इति। वृद्धयाज्ञवल्क्यः। जन्मन्येकोदकानां
तु त्रिरात्राच्छुद्धिरिष्यते। शावस्पर्शो विशुध्यंति त्र्यहात्तूदकदायिनः। इति मनुः। अन्ये पांसमानगो-
त्राणां नामुपरमे आशौचनियममाह॥ अथाष्टमवृत्तं॥ पक्षिण्याशौचमत्रिगुदुहितृसुतस-
हाध्यायी बंधुश्रयांते वासिभ्यश्वसुमित्रे श्वशुरभगिनीकाभागिनेया प्रयाणे। मातामहपां च
पित्रोः स्वसरि च विरते मातुले मातुलान्यां चाधीसज्ज्योरवस्त्रविषयनृपतौ ग्रामनाथे च न-
ष्टे॥ ८॥ ऋत्विगाद्याः भागिनेयांताः प्रसिद्धाः तेषां प्रयाणे मृतौ मातामहस्य च विरतायां पित्रोः
स्वसरि मातृस्वसरि च विरतायां मातुले च विरते मातुलान्यां मातुलपत्न्यां विरतायां प-
क्षिण्याशौचं कारणं अथो सज्योतिरिति स्वविषयं नृपतौ स्वदेशाधिपतौ च नष्टे सज्योति-
रेव कालभेदहेतुः। समानज्योतिरादित्यो नक्षत्रं वा यस्मिन्सज्योतिरित्यानष्टे यावत्स-

॥६॥

१२

र्यदर्शनमशुद्धिः। नक्षत्रदर्शनात् शुद्धिः। रात्रिनष्टस्य यात्रवसानपर्यंतमेवाशुद्धिरर्क
दर्शनात् शुद्धिरित्यर्थः। अत्र एषां पूर्ववृत्ते त्रिरात्रमुक्तं तेषां पुनः पक्षिणीकथनं देशकाला
दितो व्यवस्थापनार्थं। एतस्य पक्षिण्यभिधानस्य श्वश्रूश्वशुरयोश्च भगिन्यां च मातुलान्यां च मातुले पित्रोः
स्वसरि तद्वत्पक्षिणीं क्षपयेन्निशां। तथा मातुले श्वशुरे मित्रे गुरौ गुर्वंगनासु च। आशौचं पक्षि
णीं रात्रिं मृता मातामही यदि। तथा पक्षिणीमसपिंडे योनिसंबंधे सहाध्यायिनी चेत्यादि वचनेना
निमूलं। अथो सज्योतिरेवेत्यत्र प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थित इति मनुवचनं। ग्रा
मेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि। शिष्ये पंचत्वमापन्ने शुद्धिर्नक्षत्रदर्शनादिति वृ
याज्ञवल्क्यवचनं मूलं। अथ नवमवृत्तं॥ शिष्योपाध्यायबंधुषु गुरुतनयाचार्यभार्यासि
गोत्रानूचानः श्रोत्रिये पुस्वगृहे परमृतौ मातुले चैकरात्रं रात्रिः सब्रह्मचारिण्यपथ तु कथम
पि स्वल्पसंबंधयुक्तेस्मिन्वासो युते स्यादिदमपि सकलं सर्ववर्ण्येषु तुल्यं॥ ९॥ एकदेशाध्या
पकः उपाध्यायः अनूचानोंगानां प्रवक्ता चतुर्दश पुरुषादूर्ध्वं सप्तपुरुषावसानः सगोत्रः इते
रत्स्पष्टं। शिष्यादिषु प्रमिते पुरेकरात्रं अहोरात्रमाशौचमिति शेषः। तथा स्वगृहे परस्मृतो मातु
ले चैकरात्रं तथा सब्रह्मचारिणी रात्रिः एकार्थेपि नातः सब्रह्मचारी तस्मिन्मृते रात्रिं अहो
रात्रं अहोरात्रमाशौचमिति गुर्वन्ते वा स्यनूचानश्रोत्रियेषु चेति याज्ञवल्क्यस्मरणात्।

॥७॥

मातुलग्रहणेन नामसबांधवः पितृबांधवा मातृबांधवाश्चोपलक्षिता इति विज्ञानेश्वराचार्यै
र्व्याख्यातत्वात्। त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति। तस्य पुत्रे च पत्न्यां च दिवारात्रमिति
स्मृतिरिति मनुस्मरणात्। एकोदकानां तु त्र्यहो गोत्रजानामहस्स्मृत इति आवालिवचनात्।
असपिंडे स्ववेश्मनि मृते एकरात्रमिति विष्णुस्मरणात्। अत्र एषां पुनर्ग्रहणं तेषामसन्निधा
नादेना व्यवस्था द्रष्टव्या। श्रोत्रियस्य समानग्रामीणस्य ग्रहणं द्रष्टव्यं। एकाहं सब्रह्मचारिणि
समानग्रामिणे श्रोत्रिये इति आश्वलायनवचनात्। अनुकथंमिति स्वल्पसंबंधयुक्ते स्नानं वा
सोपुतस्यात्। अत्राधरादोषिकारान्तरसत्त्वनार्थः। कथमपि केनापि प्रकारेण स्वल्पेनापि
संबंधेन संबंधिनी भगिन्यादौ संस्थिते वासोपुतं सचैलस्नानं कुर्यादित्यस्य चैलस्नाना
त्पृथग्विधिरिति भावः। तदुक्तं याज्ञवल्क्यमुनिना। भगिन्यां संस्कृतायां तु भ्रातर्यपि च संस्कृते।
मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते। शालके तत्सुते चैव सद्यः स्नानेन शुध्यति। इदमा
पुत्रां चेसकालेमाशौचं सर्ववर्णेषु तु साधारणमिति स्पष्टं। इदानीमाशौचान्तरसन्निपाते
दशाहमवत्तौ निर्णयमाह॥ वृद्धाशौचस्य मध्ये तु परमपि समं स्वल्पकं वा सजाति प्रेते जातं तरं
नायदि भवति तदा पूर्वेणैव शुद्धिः। द्वाभ्यां तं द्वाविशेषे त्रिभिरपरदिने यामिनी यामशेषे
नैवाशौचं न पित्र्यं पितृरुपरमने साक्षिणीमातमसौ॥३०॥ अस्यायमर्थः॥ वृद्धाशौचस्य

॥७॥

14

मध्येपूर्वप्रवृत्ताशौचस्यमध्येतु पुनर्यदिअपरमपिअन्यमपिसमंदशाहाशौचस्यमध्येप
शाहमेवाशौचांतरंस्वल्पकंवात्रिरात्रादिकमाशौचंसजातिसमानजातियंजाताशौचमध्येजा
ताशौचंप्रेताशौचमध्येप्रेताशौचंभवतितदापूर्वशेषेणशुद्धिः।सममंस्वल्पकंचेत्तनेनस्वल्पा
शौचमध्येपतितस्यपूर्वाशौचस्यनपूर्वेणशुद्धिरित्यावेदितं।तदुक्तंमुशनसा।स्वल्पाशौ
चस्यमध्येतुदीर्घाशौचंभवेद्यदि।नपूर्वेणविशुद्धिस्यात्स्वकालेनैवशुध्यतीति।तथा
मेतेप्रेताशौचमध्येयदिजाहंतरंविजातीयाशौचंजननाशौचंभवति।तदापूर्वेणमृता
शौचेनैवशुद्धिः।एएतेनआताशौचस्यमध्येजातस्यप्रेताशौचस्यनपूर्वेणशुद्धिरिति
स्थापितंशातेन।शुध्यतेस्मृतिर्नस्मृतिः।शावशौपित्रातिस्मरणात्।द्वाभ्यां तदात्रिशेषरात्रि
मात्रावशेषेयदाशौचांतरंपूर्वेकंभवेत तदाद्वाभ्यांपपरदिनाभ्यांशुद्धिः।त्रिभिरपरदिनैः
यामिनीयामशेषइतियामिन्यायास्तृतीयःप्रहरः।तन्मात्रावशेषेत्रिभिरपरदिनैंपूर्वाशौ
चादधिकैःस्त्रिभिर्दिवसैःशुद्धिः।नपूर्वशेषेमात्रेणेति रात्रिशेषेसतिद्वाभ्यांप्रभातेतिस्
भिःस्मृतेतिगौतमवचनादितियावेत।नैवाशौचेनपित्र्यंमातापित्रसंबंध्याशौचंपूर्वा
शौचशेषेणनैवशुध्येत्।किंतुपितृरूपरमेवातत्वेपरमेतद्दशाहमेवाशुद्धिरितिभावः।

शौ० च

॥८॥

त्रयोः मातृपित्रोर्विरतिनिमित्तयोः परस्परं संनिपातेन पूर्वाशौचशेषेण शुद्धिः। किंतु मा
त्राशौचमध्ये पितृपाते तस्मात् पित्राशौचस्यानसंकोचः। मातुर्विशेषमाह। पितृरूपशमनं इ
ति पितृरूपशमने मातृमृत्यौ पित्राशौचमध्ये मातृमृत्यौ पक्षिणी अधिका कार्या न यावद्दशाहमि
ति भावः। तथा च स्मृतिः। मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता। पितुः शेषेण शुद्धिः स्यात् मातु
कुर्यात्तु पक्षिणीमिति॥ अथैकादशावचनं॥ सर्वत्राशौचमतयेदिविदितमिदं शेषमात्रेण
शुद्धिः दाहादाहिताग्नेर्मरणादिवसतोऽन्यत्र कुर्याद्दिशौचं॥ पूर्वस्मात्तासच्चेलं विहित
हितहतावहेकोः स्मृतिकातुत्रिंशद्रात्रं विद्योत्पोपितृ स्वरकरणो विंशतिः पुत्रसत्ना॥११॥
सर्वमिदमाशौचं यथाशौचान्तर्मध्ये एवविदितं ज्ञातं भवति तदा शेषमात्रेण शुद्धिः॥
दशाहमध्ये यान्यवशिष्टानि दिनानि तावन्मात्रेण शुद्धिः। रवत्तानादारभ्य दशाहमिति
यावता एकत्रिदिनाद्याशौचेपि द्रष्टव्यं प्रोषिते कालशेषः स्यादिति याज्ञवल्क्यस्मरणात्।
दाहादाहिताग्नेरिदमाशौचं आहिताग्नेर्दाहादाहादिवसतो दशादिनं कुर्यात्। न मरण
दिवसत इति अन्यत्रानाहिताग्नेर्मरणदिवसतः कुर्यान्न दाहदिनसादिसर्थः। अनग्नि
क्रमतः उत्क्रांतेः साग्नेः संस्कारकर्मणः शुद्धिः संचयनं दाहात् मृताहरत्न यथाविधि संप्र

॥८॥

रोरुचनात्॥ आशौचांते यदहस्त्वाशुचिर्भवति तदा हप्यूर्णस्नात्वेति पूर्णे आशौचे सचैलं स
वस्त्रं यथा भवति तथा स्नात्वा विहितहितदत्तौ दैवकार्ये चार्हकाः योग्याः स्युः ज्ञातय इति
शेषः॥ सूतिकाया विशेषमाह। प्रसूतिकायास्त्विति सूतिका तु पुनः स्त्रिंशद्रात्रिमासमात्रं पितृ
कार्ये पितृकार्ये सुरकारणे देवकार्ये न योग्या शुद्धा न भवतीति भावः॥ एतत्कन्याप्रसवे
पुत्रप्रसवे विशेषमाह। पुत्रप्रसूतस्त्रिंशतिदिनानि उभयकार्ये योग्या न भवतीति इदं स व
चयः। सूतिका पुत्रवती विंशतिरात्रेण कर्माणि कारयेत्। मासेन स्त्रीजननीमिति पैठीनसी
वचनात्॥ अथ दाहदशरात्रं॥ निर्हृत्यान्यं प्रमीतं दिवसमशुचि कोथा सवर्णे तदुक्ताशौचे यथा नाथ
माधकृतेश नफलं भागास्मवैवे न शुध्येत्। गौतमोपाध्यायमातापितृ परमगुरूणां च ब्रह्मचा
रीन दोषातेभ्योऽन्यं निर्हृतो स्य व्रतमपि वितत्तं भवति नियतं त्रयमेव॥१२॥ अन्यं सवर्णमसपिं
डं निर्हृत्य दिवसमशुचि भवति। एतदहोरात्रं मतं मूर्धाभिषिक्ते तदन्नभोजने तु त्रयं तदहृ गा
सिनस्त्रिरात्रं तदन्नाशितस्य दशरात्रमिति विज्ञेयं। तथा च मनुः। असपिंडं द्विजं प्रेतं विप्रो नि
र्हृत्य बंधुवत्। विशुध्यति त्रिरात्रेण मातुराप्तांश्च बांधवान्॥ यद्यन्नमत्ति तेषां तु
दशाहेन शुध्यति। अनदन्नन्नमह्ना तु न चेत्तस्मिन् गृहे वसेत्॥ अथ सवर्णनिर्हरणे तदुक्ताशौचं

यद्यशौचीयस्य निर्हरणं तेन कृत्स्नाशौचं ॥ ब्राह्मणश्चेत् शूद्रं निर्हरन् तद् मासं अशुचिः ॥ तथा
शूद्रश्चेत् ब्राह्मणं तदा दशरात्रमित्यादि सेयं । अवरश्चेद् वर्णः पूर्ववर्णमुपस्पृशेत् । पूर्वो वाऽ
परं तत्र तत्राशौचमाशौचमिति वचनात् । अत्र निर्हरणोपस्पर्शशब्दाभ्यां प्रेतवहनं लक्ष्यं । एतत्
स्य अपवादमाह । अथानाथमिति अनाथप्रेतं निर्हृत्य आद्यक्रतुशतफलभाग्भवेत् । आप्लवे
नैव शुध्येत् । आद्यक्रतुरग्निष्टोमः । प्लवः स्नानं एवकारेण न स्नानानन्तरमाशौचनिवृत्तिः
प्रतिपादिता । यथाह पराशरः । अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः । पदे पदे यज्ञफलमनु
पूर्वं लभन्ति ते । न तेषामशुभं किंचित्पापं वा शुभकर्मणां । जलावगाहनात्तेषां सद्यः शौचं
विधीयत इति । अथ ब्रह्मचारिणो विशेषमाह । नीलोपाध्यायमातापितृपरमगुरून् ब्रह्म
चारी न दोषी । उपाध्यायान् निर्हृत्य ब्रह्मचारी न दोषी दोषभाक् न भवति ब्रह्मचारी व्रतात्
न भ्रश्यत इति आचार्यपित्रुपाध्यायान् निर्हृत्यापि व्रती व्रतीति याज्ञवल्क्यवचनात् । अन्यान् निर्हर
णे दोषमाह । तेभ्योऽन्यं निर्हृतोऽस्य व्रतमपि विततं भ्रश्यते अवश्यमेवेति । तेभ्यः उपाध्यायादिभ्यो
ऽन्यं निर्हृतोऽस्य ब्रह्मचारिणः विततं विस्तृतं व्रतमपि अवश्यमेव भ्रश्यते ब्रह्मचर्यात् च्युतो
भवतीति यावत् ब्रह्मचारिणः शावकर्मिणो व्रतान्निवृत्तिः अन्यत्र मातापित्रोरिति वसि
ष्ठवचनादिति भावः ॥ एवं निर्हरणाशौचमुक्त्वा अनुगमनाशौचं त्रयोदशेन वृत्तेनाह । अथ

॥१९॥

पत्रयोदशवृत्तं ॥ तुल्योहःस्थानुयाने वसनसहितकोंभस्यथाहुसनंकिंस्पर्शाज्यं प्राश्य शुध्येद्य
दिनमशुचिहीं नवर्णानुयाने। पक्षिण्येकां तरानुव्रजनइहभवेद्युं तरत्वे त्रिरात्रं हत्वा स्नात्वासु
नधीवसुयमनत्रातं स्पर्शशंच कुर्यु ॥ ५५ ॥ तुल्योहःस्थानुयाने ब्राह्मणस्य ब्राह्मणानुगमनं तुल्यानु
यानं एवं क्षत्रियादेः स्वस्ववर्णमनुगमनं तुल्यानुयानं उहःस्थानुयानं तु क्षत्रियस्य ब्राह्मणानुग
मनं तथा वैश्यशूद्रयोः ब्राह्मणक्षत्रियानुगमनं शूद्रस्य ब्राह्मणक्षत्रियवैश्यानामनुगमनं त
स्मिन् तुल्योहःस्थानुयाने सति वसनसहितः कः सनग्नः अंभसि निमज्य वापुसात्स्नात्वा वह्निंस्पृष्ट्वा
ज्यं प्राश्य विशुध्येत्। प्रसिद्धमेतत्प्रास्यार्थकथनं। अत्रानुगमने छायापत्ते तं हि मत्ता तिमेव
चः स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति मनुवचनं। मूलं वेदितव्यं। हीनानुगमने
शौचमाह। अथ दिनमशुचिरिति हीनवर्णानुयाने ब्राह्मणस्य क्षत्रियानुगमने क्षत्रियस्य वै
श्यानुगमने वैश्यस्य शूद्रानुगमने क्षत्रियाद्यनुगता ब्राह्मणादिर्दिनमहोरात्रमशुचिर्भु
द्भवतीति विशेषः। पक्षिण्येकांतरेति एकांतरानुगमने व्रज ब्राह्मणस्य वैश्यानुगमने क्षत्रि
यस्य क्षत्रियस्य शूद्रानुगमने पक्षिणीमशुचिर्भवेत्। द्व्यंतरत्वे ब्राह्मणस्य शूद्रानुगमने त्रि
रात्रमनुगता ब्राह्मणोशुचिर्भवेदिति संबंधः। त्रिरात्रानंतरं हत्वा समाह त्रिरात्रं हत्वानंतरं
स्नानं यामुन्तमजले स्नात्वा असुयमुनत्रानं प्राणायामशतं हत्वा सर्पिराशं घृतं प्राशनं कुर्युः स्व

॥११॥

जन्मन्यस्पृश्यतानोभवतिकुल्यमुखांमातृवर्जंपितुश्चस्नानादूर्ध्वंसचैलादथनिधनदश
ताशौचकल्पेत्रिभागे ॥ पूर्वीशस्योपरिष्टुंमहतिचयेदिसंचायनेंदनमासीनो येत्तस्योप
रिष्टादथतुगृहतयोदासयोराल्वोर्ध्वं ॥१८॥ जन्मनिजन्मेताकुल्यमुखांसपिंडानांसोदकानांवा स्पि
स्पृश्यतानोभवति । भ्रातृवर्जमितिमातुःस्मृतिकायाः अस्पृश्यताभूवेदेत्यर्थः । पितुर्विशेषमाह । पि
तुश्चस्नानादूर्ध्वंसचैलातिसचैलात्सवसनात्स्नानादूर्ध्वंपितुरप्यपितुरेस्पृश्यतानोभवती
तिपूर्वेणसंबंधः । तथाचसंवर्त्तः । जातेपुत्रेपितुःस्नानंसचैलंतुविधायतइति । मातामुखेदृशाहे
तस्नानातुस्पर्शनंपितुरानंतरमिरोरचनमीप । स्मृतिकेसरातकानर्न्यसंस्पृशोनावाविध्यत
इति । मृततीशौचेपृस्पृश्यत्वसंकोचमाह । अथतानिधनदशताशौचकेअल्पेत्रिरात्रादिशत्रि
भागेत्रिधाविभक्तेप्रथमात्रशादुपरितनयभागाद्यंतआस्पृश्यतानोभवतीतिसंबंधः ॥१९
समहतिचयेतिमहतिचदशाहादिकेपिप्रच्छअयमेवप्रकारः । यदिसंचायनंअस्थिसंचयनं
प्रथमदिनसप्तरंदनमासीत्तत्रायंचभागप्रकारः । यदितुनप्रतंस्यानार्हतस्योपरिष्टाद
स्थिसंचयनानंतरंदिनानित्रिधाविभज्यप्रथमभागंपरित्यज्यउत्तरभागाद्येअ
स्पृश्यतानोभवतीतितथाचप्रथमभागेअस्पृश्यमित्येतितात्पर्यं । स्पाशौचकालाविशे
ष

॥११॥

22

अंगास्पर्शनमिच्छति वर्णानां तत्तद्दर्शने । त्रिचतुःपंचदशभिः स्पृश्या वर्णाः क्रमेण तु । इति देवलस्मरणात्
संस्पर्शानं तु त्रिभागता । न दविहूस्त्रविप्राणां यथाशास्त्रं प्रणोदितं मिति । तथा दशाहादित्रिभा
गेन दत्तेनसंचयनेनकामातैं । अथ तु रहलयोराह पूर्वार्धं । अथैतयोरपि कालांतरं गृहलयोः । स्वगृहे पत्नी
योर्दासीदासयोराह पूर्वार्धं स्वामिनामनंतरं अस्पृश्यतानोभवतीति संबंधः । अथ समदशरत्नं ॥ अंत्येनोपा
श्रयोरुक्तं त्रिरजनिचरणाद्दत्तोदासादिकानां स्वाम्याशौचान्तसंख्यासमदिनगमनादूर्ध्वमस्पृश्यतुल्यकं ॥
जातेपसेतेतास्मिन्नहनि निशि च तन्मंगलाद्येषु योग्याः सर्वाः शौचं सहानो भवति यदि तत्र निवृत्तं च
त र्थं स्थितानां ॥१३॥ अंत्येनोपात्तयोः पुनः त्रिरजनिचरणोः शाशित्रयगमनादूर्ध्वं अस्पृश्यतानोभव
तीति पूर्वेण संबंधः । तुरीयेन पूर्वस्मादिशो बोदर्शितः । दत्तदासादिकानां स्वाम्याशौचान्तसंख्यासम
दिनगमनादूर्ध्वं अस्पृश्यतानो भवतीति पूर्वेणान्वयः । आदिशब्देन क्रयादिक्रमतानां संग्रहः । स्वा
मिनो यानि आशौचदिनानि तेषां संख्या तया संख्यया समसंख्यानि यानि दिनानि तेषां गमनादति
क्रमणादूर्ध्वं इत्यर्थः । अंत्यदिने न दासस्य कर्मण्येवस्पृश्यतायोग्यता न तु कर्माधिकारे तथा स्मृतिकापाद
स्याः स्वप्रसवनिमित्तं अस्पृश्यत्वं मासमितं तैः सूतकं स्वच्छिधितिया वत्सदासादाशौचेसप्र
गर्भदासो भक्तदासः स्पृहादुचिदिनिस्मृतिः । तथा दासीदासस्य वैवैयस्य वर्णस्य योभवेत् । तद्वर्णस्य
भवेच्छौचं दासो मोस्यास्तु सूतकं इत्संगिरो वचनमूलं । इदानीं जातिशौचे अनंतनिमित्तं यत्र प्राप्तं तत्र
भूयिष्ठतरा द्वैराह । जातेपसेतेतस्मिन्नहनि निशिचतन्मंगलाद्येषु योग्याः । अपसे जाते तन्मंगला
द्येषु अपसं मंगलाद्येषु कर्मसु तस्मिन्नहनि न स्यां निशि चयो ग्याः इत्यन्वयः ॥ अपमर्थः । अपसं

नांचयत्निपं कर्म कुर्वतां । सत्री अतीव्रत्त-चारीद्दातं ब्रं लभिदां तथा ॥ दाने विनाहेयत्ने-चसंग्रामे
देशविप्लवे । आपद्यपि च कष्टायां सद्यः शौचं विधीयतां ॥ इदानीमस्पृश्यत्वो भावदपि आशौचापवादमे
कोनविंशतितमेन वृत्तेनाह ॥ नाशौचात्तातयः पतितपतित्सुनञलविक्रयातनापूदो षात्सारवंउ
-चोराभ्रमरहितसुरापेयहानोपगास्तु ॥ संपर्कात्सर्प्यानिप्रक्षिप्तिपथस्पृदि वी कार्तिकायेहते षुस्वेछा
पूर्वं-चराख्यस्चलनं तत्लनिपानाशकायैर्मतेषु ॥१९॥ पतितास्तु पसादिदद्यातानिप्रस्त्रिप्रुमतास्तु प्र
तास्तु-चाल्लातयः। आशौ चाश्रुधु द्रानस्युः तथाहीषात दोषेण हेतु नायेपारवांउ आश्रयंतेते पांखांद्रि
तः। अविहितलिंगधारिणश्चौरा प्रसिद्धाः। आश्रमरहिताः सत्यधिकारे सत्याश्रमेष्ठाः सुरापेयमिश्रि
दुस्सुरापानरताः हीतोपगाः। अधमेन सहसंभोगरताः आसुमतातृ ज्ञाते यो नाशौचा स्युरितिपूर्वै
ण संबंधः। अत्र लिंगमविवक्षितं। तथा संद्र्ष्यागर्वेते न बुपिपूर्वे सर्वदीत्दिवा कार्तिश्चांडाला
ते दंतानरआभिमुख्येन प्रवृत्ताः गर्हिताः तेषु मतेषु नाशौचातातेयस्तुः तथाहृताः वंशस्तुलोहं न
लत्रोऽग्निजलं प्रसिद्धं विषं वत्सनाभादि आनशका अविवाहितो न मार्गः आदिशब्दा नेअविहितभृगु
पतनादिरभिः प्रकारैर्मते षु पिज्ञातयोः नाशौचाः स्युरित्यनेनैवन्यायः। तदुक्तं यालवल्क्ययोगीश्वरैः।
पाखंड्यनाश्रिताः स्तेना भर्तृघ्नः कामगादिकाः। सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः इति
इदानीमाशौचिनामपि कृपादयं ताद्दिरातिततमेनवृत्तेनाह ॥ नाशौचं शरुकाष्ठात्तिनलवणतवाक्षीर
ग्रमीषेषुपुष्पेमूले फले तौषधिदधिमधुषुस्यात्तिलेष्वाम भोज्ये ॥ दुग्धाद्याद्दिमानिस्वयमनुमन
नात्स्वामिनो यान्तिताताशौचेवाद्यत्रिमेवपाणितमपणितं चापि सर्वं स्पृश्यमुच्यते ॥२०॥ पातितातिः

अथ नादावप्यपवादमाह ॥ अङ्गाह तेनं नेधं नेस्यादिद्धनं काष्ठं दहनेग्निर्धतमाल्यं आदिश
ब्देनपथः प्रभृति यदुपयुज्यते तत्संग्रहः ॥ अङ्गाह तेनं धनादिना योगाहः सगाहो व्यगाहः इति योअ
नासगाहो न भवति । इत्तोप्यत्र तत्र वेस्यर्थः ॥ तथाह्ययमः ॥ यस्यानयंति शूद्रोग्निं तृणं काष्ठह
विंषि च । प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्यत इति ॥ अथ दानिं रात्रं ॥ सर्वं तूष्णीं विदध्या
दुपनयनविधेः प्राक् परन्तु स्वशाखागृह्योक्तैः स्वविधानैः सकलशवविधिं ज्येष्ठपुत्रो व
रो वा । पुत्राभावे क्रमेण स्वकुलजननीवंशभिक्षिष्यति यह्लो गाचार्यो वा यत्र कुर्यात्प्रथमदिनावि
धिं सोपि तत्र सकलं तं ॥ २३ ॥ एतत्सर्वं दशाहादि उपनयनविधेः प्राक् तूष्णीं मंत्रक्रमेण विदध्यात् । तथा
चोक्तं । लौगाक्षिणा तूष्णीमेवोदकं दद्यात् तूष्णीमेव संस्कारं चेति । परं तिति उपनयनानंतरं स्वशा
खागृह्योक्तैर्नादिधानैः स्वस्वागृह्योक्तेन मार्गेण विदध्यादिति स्पष्टमेव तत्र । अत्र च उपेतस्य दाहि
साप्यावश्यकार्थं वदिति यात्तत्वलक्ष्यवचनमनुसंधेहं । इदानीमधिकारिणं निरूपयति । सकलेतिस
कलं सवंशावविधिं प्रथमदिनमारभ्य दशाहांतं स्वगृह्योक्तकर्म ज्येष्ठः पुत्रो वरो वा विदध्यादिति सं
बंधः ॥ पुत्राभावे कर्तृविशेषमाह दर्शयति पुत्राभावे क्रमेणेति । पुत्राणामभावे क्रमेण स्वकुलज
सपिंडः सोदको वा तदभावे जननीवंशजस्तदभावे शिष्यस्तदभावे ऋत्विक् तदभावे आचार्यो वा
विदध्यादित्यन्वयः ॥ सकलेसनेन दशाहांतं कर्तव्ये देनकार्यमिति सूचितं । तथा च गृह्यपरिशिष्टे ।
असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् । प्रथमेहनि यो दद्यात्स दशाहं समापयेत् । इति अत्र

॥१३॥

गोत्रमस्मिन्निति। पुत्रा भार्ये सपिंडाः शिष्या अद्युत्स्रदभानेत्रदलिंगा आर्या इति। इदानीं देशनियममा
ह। अन्यत्र स्थितेदेशे प्रथमदिवसे विधिं कुर्यात्सोपि तत्सूतकांतं दशाहपर्यंतं यत्र प्रथमदिने दग्धं तत्र तं
स्मिन्नेव देशे सर्वदशाहपर्यंतं कर्म कर्तव्यमित्यस्मिन्संप्रः। अत्र देशनियमे शिष्टाचारो मूलमनुसं
धेयः। अत्र दयोविशं वृत्तं। आनाम्नः स्नातमात्रं नन्नलहुत नहो नाभ नर्षत्रयातः कामं चोर्ध्वं तु भि
प्रोभवतु परतेऽबोलके चौलयुक्ते ॥ निसौकाल्माविशेषाद्दर्थापत मुरवराः स्नापइत्वा बस्त्रगंधा
धेः शोभइखाम्न तमधरवननेयोग्य माऽयेर्विलिप्य ॥२२॥ आनाम्नः नामकरणात् प्राक्कृठपरे तेन
लमुपगातेरवातमात्रं स्नानमात्रं शाद्धार्थं स्पष्टपठति। नलेजेहुत नहाविति स्पष्टं नाम वर्षत्रयांतः
नामनामकरणांतत आरभ्य वर्षत्रयांतः वर्षत्रयमध्येउपरते नलहुतनाहो कामं स्वेछयाऽ
अनुत्पोतं नियतौ ऊर्ध्वं वर्षत्रयानंतरं अदत्तचूडउपरते निसौभवतः। इतउर्ध्वविशेषमाह।
येलयुक्ते निसौकाल्माविशेषाद्दिति कालाविशेषाद्वर्षत्रयात्प्राक् अपिदत्तचूडस्य निसानिसर्थः
स्वननाविधिमाह। अनेतिपत मुरवराः। पितृमुरवाः स्वननेयोग्यं प्रेतस्था पइत्वा अनंतरं स्त्रगंधा
ये: शोभइत्वा आध्यैर्विलिप्य खनेपुरातिशेषः। अत्र रोनद्विवर्षान्नखनेन्नकुर्यादुदकं ततइतिया
ज्ञवल्क्यवचनं। तथा ऊनद्विवार्षिकं प्रेतं निदध्युः बांधवा बहिः। अलंकृत्य शुचौभूमावस्थिसंच
यनादृते। नास्य कार्योग्निसंस्कारो नापि कार्योदकक्रिया। अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव
तु। इतिमनुवचनं। तथा ऊनद्विवार्षिकं प्रेतं घृतोकुंभनिखनेद्बहिः। यमगाथां गायमाना यमसूक्तमपि

॥१३॥

28

नुस्मरन्निति। यमस्मरणं च मन्त्रोमिह नुसंधेयं॥ अथ चतुर्थोवर्त्तः। प्रेतद्वारानयनं बहिर्वनि
सुरं क्षत्रियं तूत्तरेण प्राक्द्वारेणै वैश्यं पितादक्षिणे शवमलं नायायित्वा पुत्रास्सुः। ब्राह्मणं पूर्वेण नगद्वा
रदुपरतो नानुयाने नियामः। अद्वैः स्पष्टोऽथ वोढो यदि भवति मृतः प्रेतस्नानान्मुक्तिः॥२॥ अ
वनि सुरं ब्राह्मणं नगर्यां प्रेतस्य द्वारा पश्चिमद्वारेण नायायित्वा सर्वे ज्ञातयः ब्राह्मणपूर्वं बदुपुरः
सरमनुयायुरनुगच्छेयुः। अयमनुगमननियमो दर्वाग्विकमतो ज्ञेयः। तथा हयाज्ञवल्क्यः। अग्र
ज्ञानादनुव्रज्य इतरो हीनाभिरेत इति। क्षत्रियं तूत्तरद्वारेण वैश्यं प्राक्द्वारेण शवलं शूद्रं पिशदि
त्रादक्षिणस्यां दिशि यमद्वारं तेन नायायित्वा सर्वे ज्ञातयः ब्राह्मणपूर्वं बदुपुरः सरमनुयायुरि
यपर्वः। तथा च स्मृतिः। दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् पश्चिमोत्तरपूर्वैस्तु यथासंख्या
दिजानय इति। इतरेषां च यो विशेषमतस्यानुगमननियममापवादमाह। ऊर्ध्वं दिशा रदुपरता वि
ति। ऊर्ध्वं दिशा रदुपरितो द्विवर्णकमृतो ससोमनुयाने अनुगमने नियमो न तदुपरितो अनुगम
तं कर्त्तेयतोऽत्र वर्ष्य फीनगभवतीति यावत्। अत्रापि पूर्वोक्तयाज्ञवल्क्यस्मृतिरेवमूलं। अथ अ
दूस्पर्शनेतश्चवहनेदोषमाह। अस्पृष्टोऽथ वोढो यदि भवति मृतं प्रेतः शूद्रैः स्पृष्टः अथवा
कृतो भवति तदा प्रेतभावनान्नमुक्तिः। तथा च मनुः। नाविप्रस्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत्।
अस्वर्ग्या ह्याहुतिः स्यात्स्या पूद्र सस्पर्शदूषितेति॥ अथ पंचविंशतिवर्त्ते नोदकदाने विशेषमा
हा॥ ज्ञातीनां मातापित्रोः शपरमगुरोर्निसमं भोथामित्रे ताश्वस्त्रापयाज्य स्वश्रुरगुरुसुहृद्याज

॥१५॥

कानांयथेच्छं॥ न ब्रह्मब्रह्मचारी व्रती पतितपतितं क्लीब पाखंडि चौरा दद्युर्येसत्रपिंडा न लज्जलंभ
थत्रा नर्हकास्तेतु स्मृताः॥२५॥ सोतपः सपिंडाः सोदकाश्च मातापितरौ प्रसिद्धौ परमगुरुराचार्यो
मातामहश्च एतेषां सन्निवृद्द्रदकदानं नित्यमयमर्थः। सपिंडानां सपिंडोद्देशेन सोदकानां सोदकोद्दे
शेन पुत्रस्य मातापित्रोद्देशेन तथा आचार्योद्देशेन यदुदकदानं तन्नित्यमिति यथाहयाज्ञवल्क्यः।
सप्तमाद्दशमाद्वापि यातयोर्भ्युपयंस्मय इति। तथा एवं मातामहाचार्य प्रेतेनानुदकक्रियेति।
इतरत्रानियमाभावमाह। अथमित्रेति मित्रं सखा प्रत्तापारिणी तदुहिताश्च मास्वस्त्रापाद
पः प्रसिद्धाः एतेषां अंभोदानं यथेच्छं इच्छयाभवति। अनियतामिति भावः। अत्रापि याज्ञवल्क्यः।
कामोदकं सखी प्रत्तास्वस्त्रीयश्वशुरर्त्विजामिति। केषांचिदुदकदाने नर्हत्वापवादमाह॥ न
ब्रह्मेत्यादिना ब्रह्मसादयः प्रसिद्धाः ते प्रेतायोदकं न दद्युरित्यन्वयः। येसत्रे तु ये तु असत्रपिंडा न लज्ज
ना कथन्नानर्हकाः पिंडादयो ग्यास्तेपि उदकादि न दद्युरिति कुतः इत्यपेक्षायामाह। तेति तिपु
नः स्मृताः पूर्वोक्ताः स्मरण एवेति तथा च स्मृतिः। न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा। सु
नुराचिक्तां वायानोदद्युस्तत्र ओसा नि धर्मिणः। गर्भभर्तदुहाश्चैव सुरापश्चैव योषित इति।
अथ षड्विंशेन संस्कारानंतरंयत्कार्यंतदाह॥ सद्यः सा नीक्ष्य भाणासकलकुलभुवो बालट
वैश्राजतोनादेयेव इद्र वैपया सिनस नाएकवारं निमज्य। पाषाणे त्रैः सरद्धा प्रतिदिनमु
दकं ब्राह्मणे दक्षिणाशाक्षजेतद्दद्युस्तावै मतनातिमिशातु प्राङ्मुखास्ते ददीरन्॥२६॥

॥१६॥

तेसकलकुलं भुवा समस्ता ज्ञातयः बालपूर्वं बालप्रमुखाः प्रेतं संस्पृश्य पिता संस्कारस्य
ल्लामनवेक्षमाणाः नादेये पयसि प्रजित्वा वद्धपूर्वं वद्धपुरः सराः सनसनाः सवस्त्रीः एकवारंनि
मज्ज्यय प्रणेत्रिः त्रिवारं सकृदेकवारं वा प्रतिदिनं प्रसह दशादिनयावत् उदकं ददीरन्निति संबंधः।
उदकदाने वर्णभेदैः नादिङ् नियमं विदधिपिमुताता। नविशिष्ट ब्राह्मणाद्यसादिना। ब्राह्मणे मते
वता दक्षिणास्याद दक्षिणा दिशाभिमुखाः। क्षत्रिये मते वतौ उदङ्मुखाः। विशि तु मते वतौ प्राङ्मु
खाः शतअत्रयथा विभागशो शरमग्रोसंयो ज्यानवेक्षमाणा आपोभ्यु पयति ति शातातपस्मृ
तिः प्रेतस्य बांधवाः यथा व उदमुदकं मवतार्थ नर्इर्व ये पुरुदकांप्रसिंचे अपसव्यं यज्ञोपवीतं
भ ससोदकिनीमुखाः ब्राह्मणस्य उदङ्मुखाः प्राङ्मुखा क्षत्रिय वैश्ययोरिति प्रचेतो वचनेन
ल्लामिसनुसंधयम्॥२६॥ अथ समाविश्यैन वर्त्तेन चोदक दानानंतरं यत्कार्यं तदाह॥ स्नायुरेन्नी
योषित त्रिदिनं मनश्नानाः तयोहर्भिशं वा क्रीताल्लभोज्ञा नावाभिषल्ले वणपयः क्षारमंने
सजेयुः॥ स्त्रीसंगमंगलानि व्यसनहसनमुमो नो आसनाग्नि तार्णास्तार्णक्षातौ ते ष्वथातिनि
यताः संविशेयुर्निशायां॥२७॥ ज्ञातयस्तत्र पयसि क्रियोपिंड दकदानानंतरं पुनः स्नायुः स्न
नं कुर्युः। तत तत्रैव यत्कर्त्तव्यं तदाह। त्रिदिनमनशनाः ततो हार्निशमहोरात्रं वा अनशनाः क्रीता
सन्नाशनावासंतक्रीते न प्राप्तं उत्पन्नमयाचितं प्राप्तं अभिषल्ल वणपयः क्षारमंत्रं सजेयुः।
स्त्रीसंगमंगलानि व्यसनहसनमुमोदनो आसनानि सजेयुरिति पूर्वेणान्वयः। तथा नि

श्राहं कर्त्तव्यं न द्रव्यांतरमुपादेयमितियावत्। तदुक्तं शुनःशेपमुनिना। शालिना सक्तुभि
र्वापि शाकैर्वापि पृथग्निर्वपेत्। प्रथमेह्नि यद्द्रव्यं तद्दद्यादशाहिकं इति। दाहात्कादेवेति। चय
नादिनं दाहात्कादेव गण्यं न मरणादिनात्। अस्थिसंचयनं दाहान्मृताहस्तु यथाविधाग्नि
राव च श्रौतस्मार्तः। इदं चयनं आदितः सप्तमे वाहनि नवमदिने वा कार्यमिति शेषः। तथा
वसंवर्त्तः। प्रथमेह्नि तृतीये वा सप्तमे नवमे वा। अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सहेति।
तथा च स्मृत्यंतरं द्वितीये त्वस्थिसंचयनं कार्यमिति। तथा विष्णुरपि। चतुर्थदिवसे स्थि
संचयनं कुर्यात्। तेषां गंगांभसि प्रक्षेप इति। अथ केशान् त्रिंशोनखं तेन वपनादिवि
धिमाह॥ वक्ष्यस्य प्रेते तु परिवपनं नखच्छेदनं स्मृतं कांते मध्ये वा केचिदूचुः पितृप
रमगुरूणां वा पादि निसं॥ अत्र स्मार्ते शुभार्थे भणितं सुभणितं च स्वगृह्ये वैदिकसाधा
रणं च दद्यात् शुभं त्रयाभिदेभ्रसुरेभ्यः शुभार्थे॥२९॥ वार्षयस्य रदेशास्थिते सति तु पुनः
स्मृत्यंते दशमेहनि उपरि वपनं नखच्छेदनं कनीयांसः कुर्युरिति शेषः। उपरि वपनं मू
र्द्धकेशश्मश्रुवपनं वा अथवा केचित्त्रामध्ये श्राद्धे च मध्ये द्वितीये तृतीये पंचमे सप्तमे वा
दिने कर्त्तुमिच्छुर्दुरिति तथा च देवलः। दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्र
त्याज्यानि वासांसि केशश्मश्रुनखानि चेति। तथा च स्मृत्यंतरं। द्वितीयेह्नि कर्त्तव्यं क्षुर

32

॥१७॥

कर्म प्रयत्नतः । तृतीये पंचमे वापि सप्तमे वा प्रदानत इति । वपने निमित्तविशेषावश्यकता
माह । पितृपरमगुरुःषु न वापादिनिमित्तं एव न संस्थितेषु वापादिनित्यमावश्यकं पुत्रादी
नां नेतरत्रेति भावः । तदुक्तं गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ । आधानकाले सो
मे च वपनं सप्तसु स्मृतमिति । स्मृतकौंतेय कर्तव्यं तदाह । अत्र यस्मात्तेकर्म कर्तव्यं तथाभ
णितं उक्तं । यज्ञनोक्तं तत्सर्वं स्वगृह्योक्तविधिना अनंतरं दत्तोत्तु प्रायश्चित्तादर्शुभं भयभ
ते अशुभभयनाशार्थं शुभप्राप्तये च असुरेभ्यो विप्रेभ्यो दानं दद्यादिसेतत्स्पष्टं ॥२९॥ अ
थ त्रिरात्रं दृत्तं ॥ दत्तापिंडं सपिंडाः धरशावदहनस्नापकाश्च व्रजितातदेहमद्वारि चास्य प्र
शमितमनसो निंबपत्रं विदश्य ॥ आचम्यात्र्य बुदूर्वांकुरवरवृषभानक्षतां गोमयं च
स्पृष्ट्वासिद्धार्थतैलान्यथ ददृषादिपदं न्यस्य सर्वे विशेयुः ॥३०॥ अथ शवदाहानागा
तानां शवगृहप्रवेशनविधिं त्रिशोनववृत्तेनाह दत्तेति सपिंडाः पूर्वोक्ताः । तथा परे स
वदहनस्नापकाः । असपिंडाः अस्य वैपिंडदत्तादत्तेपिंडेतद्देहमृतस्य प्रेतस्य संबंधि
गृहं व्रजिता अस्य वेश्मनो द्वारि प्रशमितमनसः अव्याहृतचित्ताः संतः निंबपत्रं
विदश्य चर्विलोप आदाय आचम्यानंतरमग्न्यंबु नु स्पृष्ट्वा दृषादिपदं न्यस्य दत्वा गृ
दूर्वांकुरवृषभाव अक्षतान् गोमयं गौरसिद्धार्थ+ह+ तैलानि च ।

॥१७॥

॥१८॥

हं प्राभ्रश्रेषु रिति संबंधः। तथाच स्मृतिः। इति संस्मसगच्छेयु गृहं बालपुरःसराः॥ वि
दच्यनिंबपत्राणि नियता द्वारि वेश्मनः॥ आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान्॥
प्रविशेयुः समालभ्य दत्वाश्मनि पदं शनैरिति॥ २०॥ इति त्रिंशत्श्लोकी नाश्यसमाप्तं॥ ५॥
शाके १६८१ वर्षे विरोधिनामाब्दे श्रावण शुद्ध ११ त्रयोदशी भौमे तद्दिने इदं पुस्तकं हरि
णे लिखितं॥ शुभं भवतु॥ ५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

॥१८॥

॥ अथ कंदाः सदा कामिनीजनान्प्रियवियोगसंतप्यमानस्यान् ॥

श्रीरामचंद्रकरुणासरपूर्णहल्करानिरा